आगच्छत्” भा०। भक्षणे च “प्रोथदश्वो न यवसेऽविष्यन्यदा”। ७,३,२, “अविष्यन् भक्षयिष्यन्” “भा० वृष्वविष्यन्तसेषु तिष्ठति” १,४८,२, “अविष्यन् भक्षयिष्यन्” भा० एवमन्यार्थेषूदाहार्य्यम् ।

**अव** अव्य० अव—अच्। १निश्चये, २व्याप्तौ, ३अनादरे, ४असाकल्ये ५आलम्बने, ६शुद्धौ, ७परिभवे, ८नियोगे, ९निम्नतायां च । अयं चादिः प्रादिश्च “अव ज्ञानावज्ञालम्बशुद्धीषदर्थव्याप्ति पराभवातियोगेषु” गण० र० ज्ञाने अवगतोऽर्थः। अवज्ञाया-मवजानाति । आलम्बने आलम्ब्य यष्टिं गच्छति शुद्धौ अवदातम् । ईषदर्थे अवहन्ति अल्पं हन्ति, व्याप्तौ अव-कीर्णः। परिभवे अवघ्नन्ति । अतियोगे अवघात इत्युदा-हृतञ्च । अनादरे “अवजानासि मां यस्मात्” रघुः अव-मानः । व्याप्तौ अवकाशः अस्त्यां व्याप्तौ न सर्व्वतः प्रवेशः इति तस्य व्याप्त्यर्थकता । अवगाहते । निश्चये अवस्यति अवसायः अवधारयति। निम्नतायाम् अवनमति अवतरति अवक्षिपति अवाचीनः इत्यादिः । असाकल्य मीषदर्थः । व्रीहीनवहन्ति अवघातश्च वितुषीकरणार्थ एकदेशमात्रे घातः न तु सर्व्वावयवे इति असाकल्यद्योत-कता पराभवे शत्रून् अवहन्ति पराभवतीत्यर्थः नियोगे अवक्लृप्तिः “एवेचानियोगे” वा० अनियोगोऽनवक्लृप्तिः सि० कौ अवकल्पते । अस्य वातो लोपः वगाहः । “अवा-दयः क्रुष्टाद्यर्थे तृतीयया” वा० उक्तेः क्रोशार्थेऽपि अव-क्रुष्टं कोकिलया अवकोकिलः ।

**अवकट** अव+स्वार्थे कटच्। १अवशब्दार्थे अतिशयिताधरे ततः स्वार्थे कन् तत्रैव । [पु० ।

**अवकम्पित** अव+कपि कर्त्तरि—क्त। १विचलिते २बुद्धभेदे

**अवकर** पु० अव+कृ—अप्। १उपहतौ “स्तोमानवकरगन्महि” ता० ब्रा० “अवकर उपहतिः” भा०। २सम्मार्ज्जन्यादिक्षिप्ते धूल्यादौ । “अवकरशोधकेन” ५,१२४, मनुव्या० कुल्लू०।

**अवकर्षण** न० अव+कृष—ल्युट्। बलपूर्व्वकाकर्षणे स्थाना-न्तरनयनार्थं बलेनाकर्षणे ।

**अवकलित** त्रि० अव+कल—क्त। १दृष्टे २ज्ञाते ३गृहीते च

**अवका** स्त्री अव—ग्रहणे कर्म्मणि क्वुन् क्षिपका० न इत्त्वम्। शैवाले “तट्ठ करोत्यवकामुपदधाति अवकाभिः प्रच्छा-दयति आपोवा वा अवकाः” शत० ब्रा० “अरत्निमात्रेऽ-षाढां दक्षिणेनावकासपरिष्टाच्च” कात्या० १७,४,२८ “अवकास्तु शैवालेषु कर्क०। “मण्डूकावकावेतसशाखावेणौ बद्ध्वावकर्षति” का० १,२,१०, ।

**अवकाश** पु० अव+काश—घञ् । अवस्थितियोग्यतासम्पादके काले, देशे च । तत्र कालिकोऽवकाशः क्रियान्तरस्थितियो-ग्यतासम्पादकः सचावसर इत्यप्युच्यते, “कृत्वावकाशं रुचि संक्लृप्तम्” इति भट्टिः । द्रव्यान्तरस्थितिप्रवेशयोग्यता-सम्पादको दैशिकः स चावकाश इत्येव “अवकाशं किलो-दन्वानिति” रघुः ।

**अवकीर्ण** त्रि० अव+कृ—क्त । १व्याप्ते “चतुष्कपुष्पप्रकाराव-कीर्णः कुमा०।२चूर्णिते ३ध्वस्ते च” भावे क्त।४“अवकीर्णित्वे, ब्रह्मचर्य्यव्रतभङ्गे । अवकीर्णनिमित्तं तु ब्रह्महत्या-व्रताचरेत्”। अङ्गि०।

**अवकीर्णिन्** पु० अवकीर्णमनेन इष्टा० इनि । ध्वस्तव्रते ब्रह्मचारिणोयद्व्रतमुक्तं स्त्रीसङ्गमादिवर्जनं तस्य भ्रंशे-ऽवकीर्णता । “अवकीर्णी तु कालेन गर्द्दभेन चतुष्पथे । पाकयज्ञविधानेन नैर्ऋतं निशि याजयेत्” अङ्गि० “कुशी-लवोऽवकीर्णी च वृषलीपतिरेव च” मनुः । अवकीर्णि-लक्षणञ्च— “कामतोरेतसः सेकं व्रतस्थस्य द्विजन्मनः । अतिक्रमं व्रतस्याऽऽहुर्धर्म्मज्ञा ब्रह्मवादिनः “अवकीर्णी भवेद्-गत्वा ब्रह्मचारी तु योषितम्। गर्द्दभं पशुमालभ्य नैर्ऋतं स विशुध्यति” या० स्मृ० स्त्रियं विनाऽपि रेतसः स्रावे व्रतलोपः “ब्रह्मचारी चेत् स्त्रियमुपेयात् अरण्ये चतुष्पथे लौकिकेऽग्नौ रक्षोदैवतं गर्द्दभं पशुमालभेत नैर्ऋतं वा चरुं निर्वपेत् तत्र जुहूयात् कामाय स्वाहा कामकामाय स्वाहा निर्ऋत्यै स्वाहा रक्षोदेवताभ्यः स्वाहेति एतदेव रेतसः प्रयत्नोत्सर्गे” इति वसिष्ठोक्तेः तेन कामतोरेतस उत्सर्गेऽपि अवकीर्णित्वम् । अकामतस्तु नावकीर्णित्वं किन्तु प्रायश्चित्ताल्पत्वं यथोक्तं मनुना “स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः । स्नात्वार्क-मर्च्चयित्वा त्रिः पुनर्मामित्यृचं जपेत्” ।

**अवकुञ्चन** न० अव+कुञ्च ल्युट्। १आकुञ्चने आकुञ्चनञ्च सत् स्वावयवानामारम्भकसंयोगेषु परस्परमवयवानामनारम्भ-कसंयोगोत्पादकं वस्त्राद्यवयवकौटिल्योत्पादकं च कर्म, यतो भवति सङ्कुचति पद्मं सङ्कुचति वस्त्रं सङ्कुचति चर्म्मेति प्रत्ययः, तादृशं कर्म्म” वै० सू० उ० । करणे ल्युट् “अतऊर्द्धं सर्व्ववेदनाभवन्ति उपक्रम्य” “तोदनभेदनस्तम्भन स्वप्नावकुञ्चनाङ्कुशिकाभवन्तीति” सुश्रुतोक्ते २रोगभेदे च।

**अवकीर्णिव्रतम्** अवकीर्णिनो व्रतम् प्रायश्चित्तम्। “अथातो-ऽवकीर्णिप्रायश्चित्तं व्याख्यास्यामः ब्रह्मचारी यस्त्वा-वकीर्य्येत स चतुर्थकालमब्दं भैक्ष्यं चरेदेवं पूतो भवतीति”